[९०१] संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः । (म.भा. ३.३९१)

किं प्रयोजनम् ? 'हरिवो मेदिनं त्वा' (तै. ४.७.१४.४) । हरिवः इति [1]मतुबन्तमेतत्, तत्र 'छन्दसीरः' (८.२.१५/३६००) इति [2]वत्वे, संयोगान्तस्य लोपे च कृते, 'मतुवसो रु सम्बुद्धौ छन्दसि' (८.३.१/३६२८) इति रुत्वम्, तस्य संयोगान्तस्य लोपस्य असिद्धत्वात् 'हशि च' (६.१.११४/१६६) इति उत्वं न प्राप्नोति ।

[९०२] '[3]सिज्लोप एकादेशे सिद्धो वक्तव्यः । (म.भा. ३.३९१)

अलावीत् । [4]अपावीत् । 'इट ईटि' (८.२.२८/२२६६) इति [5]सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घत्व [6]भवति ।

[९०३] निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः । (म.भा. ३.३९२)

[7]वृक्णः । वृक्णवान् । निष्ठादेशस्य सिद्धत्वात् झलि (८.२.३६/२९४) इति षत्वं न भवति । कुत्वं तु प्रति असिद्ध एव इति तद् भवति । स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाह्रियते । तत्र [8]च निपातनमनेकधा [9]समाश्रीयते । यदा क्षीबेर्निष्ठायाम् इटि कृते इत्शब्दलोपो निपात्यते, तदा क्षीबः इति सञ्ज्ञायाम् इत्शब्दलोपस्य असिद्धत्वात् 'निष्ठा च द्व्यजनात्' (६.१.२०५/३६९३) इत्येष स्वरो न प्राप्नोति, क्षीबेन तरति क्षीबिकः इति द्व्यज्लक्षणष्ठन् न प्राप्नोति । [10]यदा तु तकारलोपो निपात्यते, तदा तस्यासिद्धत्वात् इडागमः प्राप्नोति ।

[९०४] प्लुतविकारस्तुग्विधौ [11]छे सिद्धो वक्तव्यः । (म.भा. ३. ३९३)

अग्ना३इच्छत्रम् । पटा३उच्छत्रम् । प्लुतविकारस्य असिद्धत्वात् 'छे च' (६.१.७३/१४६) इति ह्रस्वलक्षणो नित्यस्तुग् न [12]प्राप्नोति[13] ।

[९०५] श्चुत्वं धुटि सिद्धं वक्तव्यम् । (म.भा. ३.३९३)

'श्च्युतिर् क्षरणे' (धा.पा. ४१) [14]इत्ययं धातुः [15]सकारादिः पठ्यते, तस्य श्चुत्वस्य असिद्धत्वात् [16]अट् श्च्योतति, रट् श्च्योतति इति 'ङः सि धुट्' (८.३.२९/१३१) इति [17]प्राप्नोति । अटति इति अड्, रटति इति रड्, [18]क्विबन्तोऽयम् । किमर्थं [19]पुनः सकारादिः पठ्यते ? [20]इह मधु श्च्योतति इति मधुश्च्युत्, [21]क्विबन्तः, मधुश्च्युतमाचष्टे इति णिच्, [22]मधुश्च्ययति, मधुश्च्ययतेः पुनः क्विपि कृते संयोगादित्वात् सलोपः, संयोगान्तत्वाद्

---

1. मतुबन्तम् आमन्त्रितान्तमेतत् क.इ. 2. वत्वं इ.ह. 3. सिलोपः क. 4. नास्ति ब. 5. सिलोपस्य क. 6. न प्राप्नोति ब.क.इ.ह.ड. 7. नास्ति क. 8. हि ब. 9. समाश्रितम् ब. 10. यदत्र नकारलोपो क. 11. छे नास्ति क. 12. स्यात् क. 13. तस्यासिद्धत्वात् न भवति इत्यधिकम् इ 14. इति नास्ति क. 15. शकारादिः क. 16. अति इङः च्योतति क. 17. धुट् इत्यधिकम् ब.क.ड. 18. क्विबन्तावेतौ ब.क.इ.ह ड. 19. पुनरयं ब.क. 20. इह – क्विबन्तः नास्ति ब. 21. क्विबन्तम् क. 22. मधुश्च्युतयति. मधुश्च्युतयतेः क.